लोकप्रियसाहित्यग्रन्थमाला - 24

# लघुपद्यप्रबन्धत्रयी

रामजीठक्कुरः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
नवदेहली

# पुरोवाक्

दिष्ट्या राष्ट्रियसंस्कृतसंस्थानस्य लोकप्रियसाहित्यग्रन्थमालायां सुकविश्रीरामजीठक्कुरकृता लघुप्रबन्धत्रयी प्रकाशमेति। अस्यां त्रय्याम् अनुशासनम्, लीलाशुकीयम्, प्रेरणापुरुषः अब्राहमलिङ्कन इति तिस्रो रचनाः विलसन्ति। अनुशासनकाव्ये कविना ठक्कुरेण उपनिषदां तत्त्वचिन्तननिश्च्योतननिःस्यन्दिनी काव्यमार्गमानीता, पुराणवचनानां रचनावलीगुम्फने मार्मिकत्वं प्रकटीकृतम्, वित्तैषणा कदर्थिता, लोकैषणायाः दुष्परिणामा अनुभवमुपनीताः। स्वच्छन्दं विविधच्छन्दसां वरणं विहितवती कवेर्लेखनी अस्मिन् काव्ये। क्वचिच्च लोकभाषाच्छन्दांसि अपि सहजं रम्यं च स्वीकृतानि। अलङ्काराणाम् अनुपमा सुषमा, सौशब्द्यम्, अर्थगौरवम् चास्मिन् काव्येऽहमहमिकया समुन्मिषन्ति। विशिष्य च भाविकालङ्कारेण दीपकस्य मणिकाञ्चनयोगो जातः। आधुनिकजीवनस्य सङ्कटं साम्प्रतिकीं स्वार्थान्धतां तृष्णातरलतां च विशदीकृत्य अन्ततः तथैव स्फीतया वाचा कविरयं हृदयङ्गमं कारयति श्रुतिसन्देशविशेषम् -

**जगर्ज मेघो दददेति तत्र**
**दमश्च दानञ्च दया च धेलिमाः।**
**त्रिरत्नमेतन्मनसाऽवधार्यताम्**
**प्रकाशते लोकपथश्च येन॥**

**दाम्यत दत्त दयध्वं**
**गर्जति गगने घनोऽपि गम्भीरम्।**
**कर्णौ प्रदत्तधीरा**
**निसर्गवाचो हृदाऽवधर्तव्याः॥ '**

लीलाशुकीयं नाम चरितकाव्यम्। प्राचीनसंस्कृतसाहित्ये एतादृशानि बहूनि चरितकाव्यानि सुकविभिर्विरचितानि। तथाहि राजवल्लभस्य भोजचरिते

# विषयसूची


| | |
|---|---|
| पुरोवाक् | इ |
| आमुखम् | उ |
| सम्मतिः | क |
| 1. अनुशासनम् खण्डकाव्यम् | 1 |
| 2. अथ प्रथमः सर्गः – लीलाशुकीयं काव्यम् | 14 |
| 3. अथ द्वितीयः सर्गः – | 26 |
| 4. अथ तृतीयः सर्गः – | 34 |
| 5. अथ चतुर्थः सर्गः – | 41 |
| 6. अथ पञ्चमः सर्गः – | 57 |
| 7. प्रेरणा-पुरुषः अब्राहमलिङ्कनः | 63 |

श्रीमन्नीलसरस्वत्युग्रतारैकजटाभ्यो नमः

# अनुशासनम् खण्डकाव्यम्

(1)

वाचः पादसरोज-पावन-रजो लिप्त्वा स्वमस्ते मुहु-
र्ब्रूतेऽयं मधुरां कथां सुमनसो! दिव्यां पिबन्तु क्षणम्।
यस्या द्वौ कवि-भावकौ च तनयौ लोके परं विश्रुता-
वेकः सूक्तिचयं चिनोति मनसा सारग्रहीताऽपरः।।

(2)

पुण्येन कर्मणा लब्धनाकलोके निवासिनः।
सुधापायिनः सुरद्रुमच्छायानिषादिनः।।

(3)

नहि दुःखं स्वप्नेऽपि जातुचिद् ये पश्यन्तः।
नन्दनोपवनविहारिणः सुखमभ्यस्यन्तः।।

(4)

सुरबालाभिर्विलासिनः कामैकरसज्ञाः।
सुरा दिव्यमनसोऽपि रजोभिः कलुषितप्रज्ञाः।।

(5)

कामो हि यत्र रत्या सहैव सततं तिष्ठति।
पुष्पेषुणा च सुमनोधन्वा हृदयं विध्यति।।

# प्रेरणा-पुरुषः अब्राहमलिङ्कनः

## श्रीमन्नीलसरस्वत्युग्रतारैकजटाभ्यो नमः

(1)

आगतविपदं पश्यन्
भीतिविमुक्तो दधन्मनोधैर्यम्।
प्रतिरोद्धुं यः प्रभवति
स वीरसंज्ञां दधाति सत्पुरुषः।।

(2)

स्वयमपि गच्छन्नग्रे
ह्यनुगतजनतां विलोकयन् विकलाम्।
समुद्धरन् दयमानः
सुवीरनेता स कथ्यते सद्भिः।।

(3)

लक्ष्यं निजमिह लभते
कोऽपि सुपुरुषः स्वकीयसंस्कारात्।
सुमतिर्दृढसंकल्पः
दैवं चास्मै सहायतां दत्ते।।

(4)

जन्मनि किल पूर्वस्मिन्
हृदये कलिता प्रियेव विद्यापि।
कथमप्युपैति पुरुषं
पुरोऽवरोधं बलान्निरस्यन्ती।।

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )

नवदेहली